# ॥ શ્રીહયગ્રીવકવચમ્ ૨ ॥

.. shrIhayagrIvakavacham 2 ..

sanskritdocuments.org

August 20, 2017

# .. shrIhayagrIvakavacham 2 ..

# ॥ શ્રીહયગ્રીવકવચમ્ ૨ ॥

## Sanskrit Document Information

Text title : hayagrIvakavacham2

File name : hayagrIvakavacham2.itx

Category : kavacha, vishhnu

Location : doc_vishhnu

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Rajnarayanan C K krajnara at gmail.com

Proofread by : Rajnarayanan C K krajnara at gmail.com

Description-comments : hayagrIvamantre atharvaNavede mantrakhaNDe pUrvasaMhitA

Latest update : December 7, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીહયગ્રીવકવચમ્ ૨ ॥

અસ્ય શ્રીહયગ્રીવકવચમહામન્ત્રસ્ય હયગ્રીવ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્રીહયગ્રીવઃ પરમાત્મા દેવતા,
ૐ શ્રીં વાગીશ્વરાય નમ ઇતિ બીજં,
ૐ ક્લીં વિદ્યાધરાય નમ ઇતિ શક્તિઃ,
ૐ સૌં વેદનિધયે નમો નમ ઇતિ કીલકમ્,
ૐ નમો હયગ્રીવાય શુક્લવર્ણાય વિદ્યામૂર્તયે,
ઓઙ્કારાયાચ્યુતાય બ્રહ્મવિદ્યાપ્રદાય સ્વાહા ।
મમ શ્રીહયગ્રીવપ્રસાદ સિધ્યર્થે જપે વિનિયોગઃ ॥

ધ્યાનમ્ -
કલશામ્બુધિસઙ્કાશં કમલાયતલોચનમ્ ।
કલાનિધિકૃતાવાસં કર્ણિકાન્તરવાસિનમ્ ॥ ૧॥

જ્ઞાનમુદ્રાક્ષવલયશઙ્ખચક્રલસત્કરમ્ ।
ભૂષાકિરણસન્દોહવિરાજિતદિગન્તરમ્ ॥ ૨॥

વક્ત્રાબ્જનિર્ગતોદ્દામવાણીસન્તાનશોભિતમ્ ।
દેવતાસાર્વભૌમં તં ધ્યાયે દિષ્ટાર્થસિદ્ધયે ॥ ૩॥

ૐ હયગ્રીવશ્શિરઃ પાતુ લલાટં ચન્દ્રમધ્યગઃ ।
શાસ્ત્રદૃષ્ટિર્દૃશૌ પાતુ શબ્દબ્રહ્માત્મકશ્શ્રુતી ॥ ૧॥

ઘ્રાણં ગન્ધાત્મકઃ પાતુ વદનં યજ્ઞસમ્ભવઃ ।
જિહ્વાં વાગીશ્વરઃ પાતુ મુકુન્દો દન્તસંહતીઃ ॥ ૨॥

ઓષ્ઠં બ્રહ્માત્મકઃ પાતુ પાતુ નારાયણોઽધરમ્ ।
શિવાત્મા ચિબુકં પાતુ કપોલૌ કમલા પ્રભુઃ ॥ ૩॥

વિદ્યાત્મા પીઠકં પાતુ કણ્ઠં નાદાત્મકો મમ ।
ભુજૌ ચતુર્ભુજઃ પાતુ કરૌ દૈત્યેન્દ્રમર્દનઃ ॥ ૪॥

જ્ઞાનાત્મા હૃદયં પાતુ વિશ્વાત્મા તુ કુચદ્વયમ્ ।
મધ્યમં પાતુ સર્વાત્મા પાતુ પીતામ્બરઃ કટિમ્ ॥ ૫॥

કુક્ષિં કુક્ષિસ્થવિશ્વો મે બલિભઙ્ગો વલિત્રયમ્ ।

નાભિં મે પદ્મનાભોઽવ્યાદ્ગુહ્યં  ગુહ્યાર્થબોધકૃત્ ॥ ૬॥

ઊરૂ દામોદરઃ પાતુ જાનુની મધુસૂદનઃ ।
પાતુ જઙ્ઘે મહાવિષ્ણુર્ગુલ્ફૌ પાતુ જનાર્દનઃ ॥ ૭॥

પાદૌ ત્રિવિક્રમઃ પાતુ પાતુ પાદાઙ્ગુલીર્હરિઃ ।
સર્વાઙ્ગં સર્વગઃ પાતુ પાતુ રોમાણિ કેશવઃ ॥ ૮॥

ધાતુન્નાડીગતઃ પાતુ ભાર્યાં લક્ષ્મીપતિર્મમ ।
પુત્રાન્વિશ્વકુટુમ્બી મે પાતુ બન્ધૂન્સુરેશ્વરઃ ॥ ૯॥

મિત્રં મિત્રાત્મકઃ પાતુ વહ્ન્યાત્મા શત્રુસંહતીઃ ।
પ્રાણાન્વાય્વાત્મકઃ પાતુ ક્ષેત્રં વિશ્વમ્ભરાત્મકઃ ॥ ૧૦॥

વરુણાત્મા રસાન્પાતુ વ્યોમાત્મા હૃદ્ગુહાન્તરમ્ ।
દિવારાત્રં હૃષીકેશઃ પાતુ સર્વં જગદ્ગુરુઃ ॥ ૧૧॥

વિષમે સઙ્કટે ચૈવ પાતુ ક્ષેમઙ્કરો મમ ।
સચ્ચિદાનન્દરૂપો મે જ્ઞાનં રક્ષતુ સર્વદા ॥ ૧૨॥

પ્રાચ્યાં રક્ષતુ સર્વાત્મા આગ્નેય્યાં જ્ઞાનદીપકઃ ।
યામ્યાં બોધપ્રદઃ પાતુ નૈરૃત્યાં ચિદ્ઘનપ્રભઃ ॥ ૧૩॥

વિદ્યાનિધિસ્તુ વારુણ્યાં વાયવ્યાં ચિન્મયોઽવતુ ।
કૌબેર્યાં વિત્તદઃ પાતુ ઐશાન્યાં ચ જગદ્ગુરુઃ ॥ ૧૪॥

ઉર્ધ્વં પાતુ જગત્સ્વામી પાત્વધસ્તાત્પરાત્પરઃ ।
રક્ષાહીનન્તુ યત્સ્થાનં રક્ષત્વખિલનાયકઃ ॥ ૧૪॥

એવં ન્યસ્તશરીરોઽસૌ સાક્ષાદ્વાગીશ્વરો ભવેત્ ।
આયુરારોગ્યમૈશ્વર્યં સર્વશાસ્ત્રપ્રવક્તૃતામ્ ॥ ૧૬॥

લભતે નાત્ર સન્દેહો હયગ્રીવપ્રસાદતઃ ।
ઇતીદં કીર્તિતં દિવ્યં કવચં દેવપૂજિતમ્ ॥ ૧૭॥

ઇતિ હયગ્રીવમન્ત્રે અથર્વણવેદે મન્ત્રખણ્ડે પૂર્વસંહિતાયાં
શ્રીહયગ્રીવકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Rajnarayanan C K krajnara at gmail.com

.. shrIhayagrIvakavacham 2 ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*